श्रीसीतारामचन्द्राभ्यां नमः ।

अथ स्कन्दपुराणेऽभिहिता

श्रीरामगीता ।

श्रीसनक उवाच ।

प्रभुणा तेने रामेण निहते राक्षसेश्वरे । स्वस्थेषु त्रिषु लोकेषु धर्मे च स्थितिमागते ॥१॥
सीतायामनवद्यायामानीतायां हविर्भुजः । कथं क्रोधाग्निरुद्भूद्रामस्यासमये पुनः ॥२॥
कृतकृत्योऽपि भगवान् रामश्चुक्रोध यत्पुनः । आरुणेय महानेष संशयो हृदि वर्त्तते ॥३॥
अहो धन्यतमास्ते वै यैर्दृष्टं रामवैभवम् । शृण्वतामपि नोऽद्यापि रोमहर्षोऽभिवर्द्धते ॥४॥

श्रीशुक उवाच ।

अथ तस्मिन् विनिहते रावणे लोकरावणे । स्तुवत्सु सिद्धसंघेषु स्वरूपं स्मारयत्स्वपि ॥५॥
दर्शयन्निव सर्वेषां स्वरूपं पारमेश्वरम् । विसृज्य मानुषं भावं रामः स्वच्छन्दचेष्टितः ॥६॥
विश्वमेतदशेषेण सदेवासुरमानुषम् । आवृत्य स तदा राम्नो वहिरन्तरवर्द्धितः ॥७॥
यथाऽभवं प्रपंचोहं गोपयित्वा निजैकताम् । स्यामेकमेव भूयोद्य अथोत्सृज्य प्रपंचताम् ॥८॥
इत्यखण्डचिदानंदस्वरूपावेशवृंहितः । ववृधे परमाकाशो विश्वग्रामस्तदा प्रभुः ॥९॥
दिवं च पृथिवीं चैव निरीक्ष्य च दिशो दश । स्वातंत्र्यादुपसंहर्त्तुं भुवनान्युपचक्रमे ॥१०॥
बन्धको भवपाशेन भवपाशात्प्रमोचकः । कैवल्यदः परब्रह्म विष्णुरेव सनातनः ॥११॥
रामचन्द्रगुणग्रामं गुणिनो गणयन्ति ये । सर्वमंभोनिधेरंभः कुम्भेनाकलयन्ति ते ॥१२॥
ततः प्रचुक्षुभे शेषः कालानलसमन्वितः । ब्रह्माण्डं प्रोन्नयन्वक्त्रैर्ग्रसिष्णुः सचराचरम् ॥१३॥
चकम्पे मेदिनी सर्वा सपर्वतनदीनदा । सद्वीपाः सागराः सप्त संगताश्च परस्परम् ॥१४॥
युगप्तते पुरादित्या द्वादश स्वकरैर्भृशम् । प्रचेरुर्मरुताः सप्त संतप्ता वह्नितेजसा ॥१५॥
ततो देवगणाः सर्वे सिद्धाश्च ऋषयस्तथा । पुरन्दरं पुरस्कृत्य ब्रह्माणं शरणं ययुः ॥१६॥
स भीतः सह तैर्गत्वा कैलाशं चन्द्रमौलये । न्यवेदयदशेषेण रामस्य च समीहितम् ॥१७॥
भव शंकर देवेश पाहि नो महतो भयात् । कस्त्वामृते विभोस्तस्य कोपाग्निं शमयिष्यति ॥१८॥
संवर्त्तोयमकस्मान्नो रामकोपात्प्रधावति । का गतिः का दिशा किन्नामास्माकं गिरिजापते॥१९॥
अथ ब्रह्मवचः श्रुत्वा सह तैर्वृषभध्वजः । समागत्य ततः शीघ्रं वैकुण्ठं हरिमन्दिरम् ॥२०॥
दृष्ट्वा तं गरुडारूढं विष्णुं लोकाभयप्रदम् । प्रणम्य च यथावृत्तं तस्मै सर्वं न्यवेदयत् ॥२१॥
समुपेत्य ततः सर्वे ब्रह्मविष्णुशिवादयः । ददृशुस्ते महात्मानं रामं व्याप्ताण्डमण्डलम् ॥२२॥
मायावृता दिविषदस्तमतीतमायं, मर्त्या मरान्यतममित्यवमत्य याताः ।
दृष्ट्वा च तत्र कवलीकृतविश्वकोशं, भीत्या निमील्यनयना विनतिं वितेनुः ॥२३॥

देवा ऊचुः

मर्त्यस्त्रिलोकविजयी किमधोक्षजो वा, रक्षःकुलक्षयकरः स्वयमेष रामः ।
इत्यस्मदादिपशुभिः परिकल्पितं ते, रूपं चिदेवर मृषैव विभो प्रतीमः ॥२४॥
मानुष्यनाटकममेयकृपामयं ते, विष्णवाद्यमर्त्यनटनं च सदा वनांके ।
रूपं यदेतदधुना धृतमार्त्तिबन्धो, तस्मै नमोस्तु सुतरामतिविश्वभूम्ने ॥२५॥
जानीमहे तव न नाम न चापि रूपं, भासैक एव विदधासि निजेन विश्वम् ।
क्व स्मो वयं त्वयि विभो भुवनैश्च सार्कं, विद्यो न चैव नभसीव रजो भ्रमामः ॥२६॥
वाचः स्पृशंतु कामिमां बहुधा गृणन्त्यस्त्वेतामि वा क नु मनांसि लगन्त्वमूर्त्ते ।
तस्मादतर्क्यपरमार्थ सदैव यस्मै, कस्मै चिदेव महते प्रभवे नमोस्तु ॥२७॥
विधिः कथं त्वं रजसा विहीनः सत्त्वेन हीनस्तु कथं मुरारिः ।
स्वयं प्रकाशस्तमसः परस्ताद् विभ्राजमानः पुरभित्कथं त्वम् ॥२८॥
मर्त्येष्वमर्त्येषु तथेतरेषु, स्थूलेषु सूक्ष्मेषु चराचरेषु ।
दृश्येष्वदृश्येषु जगत्सु रामो, भवत्यभून्नो भविता समस्ते ॥२९॥
क्रोधो हि रुद्रस्तव विश्वमूर्त्तेः कामः प्रजानां पतिरेष एव ।
मायारमेशः स्वयमेव मोहो, वयं त्वदाज्ञानुचराः स्थिताः स्म ॥३०॥
मोहस्तवानंदघनस्य कस्माद्, द्वेषोऽद्वितीयस्य कथं च रागः ।
क्रीडां तवेमां विनिवारयेत्कः, स्वयं विनैकाममितानुकंपाम् ॥३१॥
उन्मेषमात्रं तव सृष्टिरेषा, निमेषमात्रं प्रलयोपि यस्य ।
तयोश्च साम्यं स्थितिरंडकानां' कथं नियोक्तुं वयमीश्वरा त्वाम् ॥३२॥

श्रीशुक उवाच ।

नत्वोत्थिताः प्रभुममी समुदीक्ष्य भूयो, भीतास्ततोपि सुतराममराश्च सर्वे ।
विस्मृत्य तत्वमहमित्यखिलं निरीहा स्तूष्णीं बभूवुरखिला इव निर्विकाराः ॥३३॥
अथ तेऽन्योन्यमभ्येत्य देवा विष्णुपुरोगमाः । तत्प्रभावं च दृष्ट्वेत्थं बभूवुः स्तब्धमानसाः ।३४।
स्तंभीभूतेषु सर्वेषु शंकरः करुणान्वितः । प्रसादयितुमेवैनं तुष्टाव परमेश्वरम् ॥३५॥

श्रीशंकर उवाच ।

सर्वापदुद्धरणमेकमशेष संविन्मूलाकरं च निगमा निगदन्त्यमी यम् ।
सोऽसि त्वमेव सुरनाथ सुखादिभुक्तेः, मुक्तेश्च राम ! भजतामिह यो निदानम् ॥३६॥
एके तपोभिरपरे क्रतुभिस्तथान्ये होमार्च्चनाऽध्ययनदानयमादियोगैः ।
भक्त्यैकयैव परया कतिचित्सदैव, त्वामेकमेव परमं बहुधा भजन्ति ॥३७॥
त्वं राम राम रजनीचरदुर्व्वनानां, कल्पांतपावकनिजोत्तमनामधेयम् ।

नाथ त्वर्दघ्रि सरसीरुहषट्पदानां, यस्माद्भयं त्वमभयं कुरु नस्ततो द्राक् ॥३८॥
विश्वं वपुर्भवतु वा तदतीतमस्माद्, बृंहिष्ठमन्यदपि वाऽस्तु यतो भयं नः ।
तस्मात्तदेतदुपसंहर विश्वरूपं, यत्तेजसा वयममी विवशीकृताः स्मः ॥३९॥
क्षेमं यतो हि जगतां श्रुतिभिः सदोक्तं, त्वत्तो भयं यदि ततस्त्वदुपाश्रितानाम् ।
कुर्म्मः किमत्र करुणामय यत्प्रसादाद्भक्ता भवाब्धिमपि गोष्पदमातरन्ति ॥४०॥
राम त्वमेव भगवान्प्रवणा वयं ते त्वद्वैभवैकनिलयाः परमार्थदृष्ट्या ।
व्योम्नः पृथक् कथममी प्रमिताब्जकोशाकाशास्ततः परतरात्परमेश्वरस्य ॥४१॥
क्वासीश तत्वसरणेरतिदूरगस्त्वं, तत्त्वाटवीपरिचरा हि वयं क्व च स्मः ।
त्वद्भक्तिमात्रमवलम्ब्य तथापि तुभ्यंकस्मैचिदेव महसे नम आविदध्मः ॥४२॥
नमोस्तु ब्रह्मणे तुभ्यं परस्मै विश्वयोनये । सच्चिदानन्दरूपाय विश्वरूपाय वेधसे ॥४३॥
नमो निरन्तरानन्दमूलकंदाय विष्णवे । जगत्त्रयकृतानन्दमूर्तये शुभमूर्तये ॥४४॥
नमोस्तु निर्गतोपाधिस्वरूपाय मुदात्मने । नमो ब्रह्मेशपूज्याय सर्वदेवमयाय च ॥४५॥
उत्पत्तिस्थितिसंहारकारिणे क्लेशहारिणे । नमः सहस्रशिरसे पुराणपुरुषाय ते ॥४६॥
एकांशीभूतविश्वाय त्रिपादूर्ध्वस्थिताय च । विश्वातीताय महसे नमो विश्वमयाय च ॥४७॥
अनंतशक्तये तुभ्यं नित्यतृप्ताय वै नमः । अलुप्तशक्तये तुभ्यं स्वतंत्राय नमो नमः ॥४८॥
अचिन्त्याय नमस्तुभ्यं केवलज्ञानमूर्त्तये । सन्मात्राय च विद्यायै सीतायै राघवाय च ॥४९॥
नमः प्रपंचरूपिण्यै निष्प्रपंचस्वरूपिणे । नमो ध्यानस्वरूपिण्यै योगिध्येयाऽऽत्मरूपिणे ॥५०॥
परिणामापरिणामनित्याभ्यां च नमो नमः । कूटस्थबीजरूपाभ्यां प्रकृत्यै पुरुषाय च ॥५१॥
यस्य कार्यमिदं विश्वं शब्दार्थकृति जृम्भते । तत्त्वमेव पराकाशस्त्वच्छक्तिरखिलं जगत् ॥५२॥
इच्छाज्ञानक्रियाश्चैव विद्याऽविद्या पराऽपरा । सदसद्व्यक्तिरव्यक्तं त्वच्छक्तेरखिलाः कलाः ।५३।
प्रवृत्तिश्च प्रतिष्ठा च विद्याशांतिस्तथोत्तमाः । शांत्यतीतापरासूक्ष्मा समना चोन्मनेति च ॥५४॥
सीताविलसितं सर्वं नानाकारेण दृश्यते । तवानुग्रहशक्त्येव त्वदेकमपि लभ्यते ॥५५॥
सद्योजातः प्रवृत्तस्त्वमीशिषे क्षेत्ररक्षकः । वामदेवः प्रतिष्ठाया वासनातनुमास्थितः ॥५६॥
विद्याया अप्यघोरस्त्वं तेजसां निधिरक्षयः । प्राणस्तत्पुरुषः शांतेस्तत्त्वानां यंत्रवाहकः ॥५७॥
ईशानः शांत्यतीताय व्यापको व्योमविग्रहः । विष्णुश्च समनायास्त्वमुन्मनायान्निरंजनः ॥५८॥
सेयं भावस्थितिः साक्षाद्भिन्नाभिन्नतया स्थिता । सीताशक्तिरचिंत्येयं त्वन्मूर्त्तिरचलापरा ५९
सीतोन्मना भवान् राम समनेयं भवान् शिवः । विद्येयं मातृकाशुद्धा त्वं तु देवः सदाशिवः ॥
ईश्वरस्त्वमविद्येयं मायेयं त्वं च त्र्यंबकः ॥
सीता रमा भवान् विष्णुः सीता गौरीभवाञ्छिवः । सीतास्वयं हि सावित्री भवान्ब्रह्मा चतुर्मुखः ६०
सीता शची भवानिन्द्रः सीता स्वाहानलोऽभवान् । सीता संहारिणी देवी यमरूपधरो भवान् ।६१।

सीता तु तामसी देवी निर्ऋतिस्त्वं रघूत्तम । सीता तु भार्गवीदेवी वरुणत्त्वं जगत्पतिः ॥६२॥
सीता सदागतिर्देवीजगत्प्राणः स्वयं विभो । सीता हि सर्वसम्पत्तिः कुवेरस्त्वं सदोदितः ।६३॥
ऐश्वर्य्यं जानकी साक्षादीशानस्त्वं महेश्वरः । सीता तु रोहिणी देवी चन्द्रस्त्वं लोकसौख्यदः ६४
सीता सन्ध्या भवान् सूर्य्यः सीता रात्री दिनं भवान् । सीता च दक्षिणा देवी यज्ञमूर्त्तिर्भवान् विभो
सीता भुक्तिर्भगवती भोक्ता त्वं पुरुषोत्तमः । सीतेयं मुक्तिरचला मोक्ता त्वमकुतोभयः ॥६६॥
सीता शक्तिर्जगद्धात्री शक्तिमांस्त्वं महेश्वरः । सीता देवी महाकाली महाकालस्त्वमेव हि ॥६७॥
किमत्र बहुनोक्तेन राम त्वं ब्रह्म तत्परम् । त्वद्विभूतिरियं सीता विश्वाकारा विजृम्भते ॥६८॥
स्त्रीचिन्हं सर्वलोकेषु यत्तत्सर्वं हि जानकी । पुंनाम लांछितं वस्तु यत्तत्सर्वं भवान्विभो ॥६९॥
सर्वत्र सर्वदेहेषु सीता षट्चक्रधारिणी । तथात्वमपि चक्रांतश्चिन्मूर्त्तिर्विश्वभासकः ॥७०॥
स्त्रीपुंभावादिरहितं त्वमेव परमं पदम् । त्वत्तो विभ्यति देवाश्च मनसा सहवागपि ॥७१॥
सत्यानन्दस्त्वमेवासि यत्र भेदो न विद्यते । तव लीला प्रपंचोऽयं तत्त्वं चाहमितित्रिधा ॥७२॥
सन्मात्रस्याद्वितीयस्य विभोरेकस्य ते प्रभो । शक्तितत्त्वादिभेदोयं कारणत्वे न विद्यते ॥७३॥
स्वस्वातंत्र्यात्सिसृक्षोर्वा शक्त्यादिरुपचर्यते । भजतां मुक्तये स्यातां नामरूपे महेश्वर ॥७४॥
निराकारोऽथ साकारो भक्तानामनुकंपया । स्वानन्द एव रमसे स्वच्छन्दगतिरीश्वरः ॥७५॥
भिन्नामिव विधायैनां चिच्छक्तिजनकात्मजाम् । गोपायस्यात्मनात्मानं तारकं ब्रह्मशब्दितम् ।७६।
यतो वाचो निवर्त्तन्ते मनसा सह दूरतः । तत् त्वमेव परं ज्योतिस्तमसः परमक्षयम् ॥७७॥
तवांशोहं हरिर्ब्रह्मा सर्वे देवाश्चराचरम् । जगत्पूज्यो ह्यहं तस्मादुमया सह चानया ॥७८॥
आवां राम जगत्पूज्यावावयोश्च युवां सदा । त्वन्नाम जापिनी गौरी त्वन्मंत्रजपवानहम् ॥७९॥
मुमूर्षोर्मणिकर्ण्येतदर्द्धोदकनिवासिनः । अहं दिशामि ते मंत्रं तारकं ब्रह्मवाचकम् ॥८०॥
श्रीराम राम रामेति ह्येतत्तारकमुच्यते । अतस्त्वं जानकीनाथ परंब्रह्माऽसि निश्चितम् ॥८१॥
त्वन्मायामोहिताः सर्वे न त्वां जानंति तत्त्वतः । त्वद्भक्त्यैव विजानंति ब्रह्मैकं त्वामखण्डितम् ८२
विश्वरूपस्य ते राम विश्वे शब्दा हि वाचकाः । तथापि मूलमंत्रस्ते विश्वेषां वीजमक्षयम् ॥८३॥
तारादिर्मुक्तये राम रमादिरपि भुक्तये । वाग्भावादिश्च वाक् सिध्यैर्मायादिरखिलेष्टदः ॥८४॥
अचिंत्योऽयं महाबाहो मंत्रश्चिंतामणिर्विभो । विहायैनं विमूढात्मा इतश्चेतश्च धावति ॥८५॥
अग्निषोमौ जगद्योनी विंदुनादौ क्षराक्षरौ । तारकस्तदतीतस्त्वं परमात्मा निरंजनः ॥८६॥
तत्त्वत्रयमिदं गुह्यमेकीकृत्य स्वमूर्द्धनि । स्वयंज्योतिः प्रपश्यंति यद् गत्वा न निवर्त्तते ॥८७॥
त्रीणि ज्योतींषि निर्भिद्य मनसा मारुतेन च । योगिनस्त्वां प्रपद्यंते स्वराजमचलं विभुम् ॥८८॥
रुद्राग्निरुच्यते रेफो विष्णुः सोमोऽथ उच्यते । तयोर्मध्यगतो ब्रह्मा त्वाकारो रविरुच्यते ॥८९॥
ज्योतींषि कवलीकृत्य त्रीण्याकाशो विभुः स्वयम् । नादोऽभिधत्ते सन्मात्रं त्वामेव परमेश्वरम् ।९०।

मुख्यत्वाद्विश्वबीजत्वात्तारकत्वान्महेश्वर । त्वदंशैः स्वीकृतं देवैरस्माभिर्नाम ते त्रिभिः ॥९१॥
भार्गवोऽयं पुरा भूत्वा स्वीचक्रे नाम ते विधिः । विष्णुर्दाशरथिर्भूत्वा स्वीकरोत्यधुना पुनः ॥९२॥
सकर्षणश्च तच्चाहं स्वीकरिष्यामि शाश्वतम् । एकमेव त्रिधोपात्तं सृष्टिस्थित्यंतहेतवे ॥९३॥
भ्रातरस्ते त्रयो राम ब्रह्मा विष्णुरहं तथा । त्वत्तो विनिर्गता भूयो वयं लीयेमहि त्वयि ॥९४॥
त्वमेव परमं गुह्यं त्वमेव परमं पदम् । त्वमेव परमं ब्रह्म त्वमेव शरणं हितः ॥९५॥
तत्त्वमसीति वेदान्तमहावाक्योपपादितम् । निर्वक्ति मंत्रतत्त्वार्थमिति राम नमोस्तु ते ॥९६॥
सीतानवद्या विद्येयं त्वन्मया त्वत्परायणा । पश्यैनामात्मनः शक्तिमप्राप्यामात्महिंसकैः ॥९७॥
विश्वमेतन्महावाहो लीलावसथ एव ते । दर्शेंद्रियैर्यतो विश्वं व्याप्तोसि च धिया सह ॥९८॥
पिता दशरथः सोयं दीप्यमानः स्वतेजसा । पश्यैनमिंद्रानुमतं त्वां दिदृक्षुमिहागतम् ॥९९॥
त्वदंशानमरानेतान्पितॄंश्च मुनिपुंगवान् । अनुगृहाण ते भक्तान्नः सुरेश्वर संश्रितान् ॥१००॥
त्वं हि नः परमश्चक्षुः प्रेरकः सर्वशक्तिधृक् । त्वामाश्रित्य वयं सर्वे सर्वकार्यविधायिनः ॥१०१॥
त्वं विश्वजन्मस्थितिसंयमार्थे गृहीतशक्तित्रय ईश शश्वत् ।
करोषि कर्म्माण्यतिदुष्कराणि भक्तचोपपन्नेषु सुखावहानि ॥१०२॥
भक्तास्तवांघ्रिशरणाः किल ईश लोके विज्ञाय निर्मलधिया तव रूपमैशम् ।
सर्वे त्वदर्पितमनोवचनेहितार्थप्राणा व्रजन्ति पदमक्षयमेकभावाः ॥१०३॥
ये त्वां भवाप्ययविमोक्षणलब्धदीक्षमर्चन्ति चान्यसुखहेतव आत्ममूलम् ।
नूनं विमुष्टमतयस्तव मायया ते, दैवेन शश्वदतिभग्नभगा भ्रमन्ति ॥१०४॥
नमस्ते चित्सुखायैकभक्त्या ग्राह्यस्वरूपिणे । परमानन्दरूपाय निर्गुणाय गुणात्मने ॥१०५॥
नमः समस्ततत्त्वाय तत्वाधाराय ते नमः । गुणच्छन्नमहिम्ने ते सर्वदाऽदिविषद्विषे ॥१०६॥
नमो भगवते मंत्रतत्वलिङ्गाय शार्ङ्गिणे । नमः सर्वप्रबोधाय गरिम्णे चित्सुखात्मने ॥१०७॥
त्वन्नः शक्तिधरः सर्वकार्यसंवित्प्रदायकः । त्वामुपास्य सदा भक्त्या भवामो लोकपूजिताः ॥१०८
इतिस्तुतिपरात्मानं रामं चैतन्यविग्रहम् । ब्रह्मविष्णुमहेशाद्या वरयामासुरीश्वरम् ॥१०९॥
स्यान्नस्त्वेषा तु भगवन्भक्तिरव्यभिचारिणी । त्वय्येवाविरतां भक्तिं देहि नातो वरान्तरम्॥११०॥

श्रीशुक उवाच ।

एवमस्त्विति तं चोक्त्वा प्रसन्नः करुणान्वितः। पूजयित्वा यथा न्यायं वचनं चेदमब्रवीत् ॥१११॥

श्रीराम उवाच ।

यः स्तौति परया भक्त्या स्तोत्रेणानेन मानवः । स याति परमं स्थानं यत्र गत्वा न शोचति ॥११२॥
रहस्यमन्यद्वक्ष्यामि भक्तानामनुकंपया । यस्य स्मरणमात्रेण शत्रूणां संक्षयो भवेत् ॥११३॥
हुं फट् राँ ॐ राम राम मम मन्त्रं घोरं द्राक् । हन हन योस्मान् द्वेष्टि यं च वयं द्विष्मः ॥
योसौ कालाग्निरुद्रोभून्मत्तः शत्रुविनाशनः । मदंशः सत्वमेवाऽजावमोघास्त्रं भविष्यति ॥११४॥

यत्प्रभावाद्भयं नैव शत्रुभ्यः पार्वतीपते । जप्तं हुतं सदा ध्यातं मृत्योरपि विनाशकम् ॥११५॥
अस्त्रं तु कवचादूर्ध्वं तारं च प्रणवात्पुरा । महामंत्रेण युग्मात्तु जीवाक्षरयुगं वदेत् ॥११६॥
घोरोपलक्षितं शत्रुं तच्छब्देन विनिर्दिशेत् । द्राक्पदादुपरिष्टात्तु हन द्वंद्वं समुच्चरेत् ॥११७॥
योऽस्मान्द्वेष्टि यं च वयं द्विष्म इत्येतदुच्चरेत् । एतन्मदस्त्रं शत्रूणां मूर्ध्नि वज्रं पतिष्यति ॥११८॥
कालवज्रमितिख्यातं तवस्नेहात्प्रकाशितम् । येन शत्रुभयान्मुक्तो मद्भक्तः सुखमेधते ॥११९॥

श्रीशुक ऊवाच ।

आथर्वणमिदं चास्त्रं नर नारायणावृषी । प्रायच्छेतां वशिष्ठाय सुरथंतरवर्मिणे ॥१२०॥
लक्षत्रयमिदं जप्त्वा जुहुयात्तद्दशांशतः । खादिरैराज्यसंयुक्तैस्ततः सिद्धिमवाप्नुयात् ॥१२१॥

श्रीशुक उवाच ।

इति शिवमुखपद्मादुच्छ्रितैः स्तोत्रमंत्रैः प्रतिदिनमिह भक्त्या राममाराध्यमर्च्यम् ।
यतिभिरपि दुरापं प्राप्यधामाद्वितीयं, निरवधि भव दुःखान्मुच्यते शीघ्रमेव ॥१२२॥

इति श्रीनिर्वाणखण्डस्य द्वात्रिंशत्तमोध्यायःस्कंदमहापुराणोपनिषच्
श्रीरामगीतायां प्रथमोऽध्यायः ॥१॥

श्रीशुक उवाच ।

उपांतोदितरौद्रांशं वैष्णवानां व्यवस्थितम् । तदैवांशमुपादित्सुं ब्रह्माणं च निजेच्छया ॥१॥
अनंततत्वाभरणमनंताऽऽदित्यवर्चसम् । अनंतकरपन्नेत्रशिरोवक्त्रक्रियान्वितम् ॥२॥
निराकारं च साकारं प्रभामण्डलमण्डितम् । विश्वैकसाक्षिणं विश्वं विश्वातीतं निरंजनम् ॥३॥
क्वचित्प्रसन्नमेवात्र शांतमन्यत्र भैरवम् । नानाशक्तिसमाकीर्णमधृष्यानेकविग्रहम् ॥४॥
इत्थमीश्वरभावेन क्रीडंतं परमेश्वरम् । प्रतिलोमविलग्नैश्च ब्रह्माण्डैरभिमंडितम् ॥५॥
बहुरूपमरूपं च दृष्ट्वा रामं हरिस्तदा । तुष्टाव प्रणतो भूत्वा भूयो भूयः कृतांजलिः ॥६॥

श्रीविष्णुरुवाच ।

नमो रामाय विभवे तुभ्यं विश्वैकसाक्षिणे । नमो विश्वैकदेहाय नमो विश्वातिगाय ते ॥७॥
नमो नित्याय शुद्धाय प्रभवे कालमूर्त्तये । दशदिग्वाहवे तुभ्यं नमो भूचरणाय च ॥८॥
नमोऽभोरेतसे शश्वत्तेजोनेत्राय ते नमः । वायुचेष्टाय महते व्योमदेहाय ते नमः ॥९॥
अहं ते हृदयं राम तव नाभिः पितामहः । कंठस्ते नीलकंठोऽसौ भ्रूमध्यं च दिवेश्वरः ॥१०॥
सदाशिवो ललाटस्ते तत ऊर्ध्वं परः शिवः । भूषणानि च तत्वानि विश्वाकाराय ते प्रभो ॥११॥
भूरादिसप्तलोकाश्च नृत्यतो रंगभूमयः । सप्तपातालगर्त्तश्च पार्ष्णिवाताः स्थिता हि ते ॥
अनंताः शक्तयो राम प्रदृश्यंते तव प्रभो । बहूंश्चादृष्टपूर्वांश्च पश्याम्यद्य पितामहान् ॥१३॥

विष्णुनसंख्यान् पश्यामि त्वयि रुद्राननेकशः । वहुरूपान्वहुभुजान्वहुवर्णान्महोदयान् ॥१४॥
वर्त्तमानानतीतांश्च सुरानिह भविष्यतः । नाऽहमन्तं प्रपश्यामि विभूतीनां तव प्रभो ॥१५॥
देवदानवगंधर्वा यक्षराक्षसकिन्नराः । विद्याधराश्च ऋषयः सिद्धाश्च सहचारणैः ॥१६॥
नराश्च पितरश्चैव पशवश्च सरीसृपाः । त्वदेकरोमकूपे तु लीयन्ते स्थावरैः सह ॥१७॥
सेयं माया गुणमयी प्रपंचोऽयं यदात्मकः । तवेच्छातः समुत्पन्ना यया विश्वं विमोह्यते ॥१८॥
तवांशवोमी चिद्भानोः क्षेत्रज्ञास्त्वस्मदादयः । भिन्ना इव प्रदृश्यंते मायया परमार्थतः ॥१९॥
यत्र ग्रहा सनक्षत्राः सिद्धाश्च ऋषयस्तथा । येन व्याप्तं च सकल तत्ते नाभिर्विभो नभः ॥२०॥
त्वामाहुरानंदमखंडमेकं निरस्तमायोपधिमाप्तवांचः ।
यस्मिन्सपक्षो नच वा विपक्षो नाचाध्यषट्कं न मलत्रयं च ॥२१॥
षड्धर्म्मयो वा न च नामरूपे, न कारणं त्वं च न कार्यतापि ।
नान्तो न चादिर्न च मध्यमीषदालंवनं नैव च शून्यभावः ॥२२॥
यतोऽतिदूरे निवसंति वाचो, मानान्यनेकानि हृदा सहैव ।
येनैव विश्वं महसा स्वाभासा, पूर्णं सुसूक्ष्मेण निरंतरेण ॥२३॥
यस्यांशभूताश्च वयं तथान्ये, सुराः समस्ताः पितरश्च सर्वे ।
किंवा वहूक्तेन जगत्समस्तं विभो विभूतिः परमा रिरंसोः ॥२४॥
परात्परायाहृतविश्वभूम्ने तस्मै स्वधाम्ने हि नमो वितन्मः ।
यज्ञानशेषान् जुहुमश्च यस्मै स्वधां विदध्मः प्रपितामहाय ॥२५॥
त्रयी समस्ता च वषट्कृतिः सा स्वाहा जगद्विश्वभुजे च यस्मै ।
उद्गीथ एवायमलं यदाप्तैर्वेदादिवीजं विजितानिलानाम् ॥२६॥
नित्याय नित्यप्रभवे प्रभूणां, सदावधूताखिलविक्रियाय ।
द्रुह्यंत्यविद्योपहताश्च यस्मै,, मर्त्यादिभावं परिकल्प्य मूढाः ॥२७॥
देवाश्च सिद्धा ऋषयश्च सर्वे, वेदांततत्त्वार्थविदो यतीन्द्राः ।
भक्त्यैव राम स्पृहयंति यस्मै, त्वमेव तद् ब्रह्म यदद्वितीयम् ॥२९॥
यदैकमात्मानमनेकधैव विभज्य विश्वं व्यतनोरमूर्त्ते ।
तदेव भानोरिव रश्मयोमी, त्वत्तो वयं रामविनिःसृता हि ॥२९॥
राम क्रियाशक्तिरियं हि पंच, प्राणान्समाविश्य करोति विश्वम् ।
चिच्छक्तिरेषा तव पंचधैव, भुंक्ते जगच्चापि हि पंचवक्त्रा ॥३०॥
इच्छोभयत्राऽनुगतादशास्या, सृजत्यवत्यत्ति च शक्तिराद्या ।
अनंतशक्तेरिह विश्वमूर्त्तेस्तिस्रो दृशः शक्तिमतस्तवैव ॥३१॥
याभिर्महेश्वर सितासितलोहिताभिः, स्वाभिः कलाभिरचलप्रभुरात्मतृप्तः ।
सत्वं प्रपंचयसि विश्वतया विहर्त्तुं, त्वामेकमेव विभुमव्ययमद्वितीयम् ॥३२॥

ताभ्यस्तिसृभ्य उदितानतु तावकीभ्यो, गौरीन्दिरागिर इहेश्वरशक्तयोऽपि ।
तत्षोडशांशविभवानि वसंति नित्यं, रुद्रेषु विष्णुषु विधातृषु विश्वभूत्यै ॥३३॥
पूज्योहमंधकरिपुश्च तथा विरंचिस्त्वद्भावभाविततयैव जगत्सु नित्यम् ।
एतेपि केचन जयंति निरस्तकामास्त्वद्भक्तिधौतमनसो भुवनेवधूताः ॥३४॥
अपि स्वदेहादिषु निःस्पृहाणामाकाशलीनानिलचेष्टितानाम् ।
त्वमेव कल्याणकृतां मुनीनां, मालंबनं ध्वस्तभवाटवीनाम् ॥३५॥
किं तन्महेश्वर विभो वहुधा विमृश्य, तत्रासि यत्सदपि वाप्यसदेव वस्तु ।
ज्ञातुं तथाप्यपरिमेय न शक्यसे तैर्यैषामनुग्रहदृशा न पुनासि चेतः ॥३६॥
क्वचायं मानुपो भावः क्वचायमतिलौकिकः । त्वन्मायामो हितानां नस्त्वमेव शरणं भव ॥३७॥
कोसि ब्रूहि महेशान किं तवाद्य समीहितम् । अत्यद्भुतं ते वैश्वात्म्यं मुह्यामो यन्निरीक्षणात् ॥३८॥
त्वमेव वेत्थ त्वां सम्यग्योसि सोसि महेश्वर । द्योत्यसे नैव मानैस्त्वं खद्योतैर्द्युमणिर्यथा ॥३९॥
अन्तोस्ति परमाणूनां मरुत्तेजोंबुभूमिषु । नांतोस्ति त्वयि लीनानां ब्रह्मांडानामखंडिते ॥४०॥
लक्ष्यंते येन वहवो ब्रह्माणोतिपराक्रमाः । विलक्षणा मिथश्चैते स्वरूपायुधवाहनैः ॥४१॥
केचिच्चतुर्मुखाः केचित्पंचवक्त्राश्च षण्मुखाः । दशवक्त्रा शतास्याश्च सहस्रवदना अपि ॥४२॥
बहुवक्त्रा वहुभुजा वहुरूपास्तथा परे । विचित्रसृष्टिकुशला विचित्रायुधवाहना. ॥४३॥
विचित्रशक्तयो भक्त्या त्वां नमंति महेश्वरम् । स्तुवन्ति वहुभिः स्तोत्रैरेके ध्यायंति निश्चलाः ॥
त्वत्प्राप्त्युपायमन्योन्यं वोधयन्ति विमत्सराः । प्रपन्नाः सर्वभावेन त्वमेव शरणं परम् ॥४५॥
एवं वहुविधाकारवाहनायुधविग्रहाः । विचित्रशक्तयोऽनंता हरयश्च कपर्दिनः ॥४६॥
त्वत्प्रभांशांशविभवास्त्वां सदा पर्युपासते । अनुगृह्णीष्व भक्तान्नः प्रसादाद्विश्वतोमुख ॥४७॥

श्रीशुक उवाच ।

इति तेनस्तुतो रामो विष्णुना प्रभविष्णुना । प्रसन्नोत्फुल्लवदनैः प्रहसन्वाक्यमव्रवीत् ॥४८॥

श्रीराम उवाच ।

अहमात्मा परो नित्यः सन्मात्रो विभुरीश्वरः । सदसद्भावरहितो भेदाभेदविवर्जितः ॥४९॥
एकोऽद्वितीयोऽविकृतो निराकारो निरंजनः । मच्छक्तयो विश्वमिदं भिन्नाभिन्नतया स्थितम्
यत्र त्वमन्ये बहवस्तत्त्वानामधिपाः सुरा । मदंशांसावलंबेन खे खद्योता इवासते ॥५१॥
अहमेवादिरानंदो निरालंबः स्वराड् विभुः । सर्वः सर्वगतः शांतः शुद्धश्चैतन्यविग्रहः ॥५२॥
आकाशस्यास्मि चाकाशो दिग्दिशामस्मि शाश्वती। कालस्यापि महान्कालो ज्योतिषां ज्योतिरुत्तमम्
कारणं कारणानां च करणानामहं मनः । अणूनां परमाणीयान्महतां च महत्तरः ॥५४॥
विभुविभूनामधिकस्तत्वानां तत्त्वमुत्तमम् । योगो निर्वाणमार्गाणामहमस्मि सनातनः ॥५५॥

प्राणः प्राणभृतामस्मि दमश्चास्मि तपस्विनाम् । शांतिरस्मिमुक्षुणां प्रणवोऽस्मि गिरामहम् ॥५६।
विधिः क्रियावतामस्मि निवृत्तिरपि योगिनाम् । दीक्षितानां रतिश्चास्मि विरतिश्च विवेकिनाम्।
महोपनिषदं विष्णो संगृह्य कथयामि ते । समनांसं संसरिष्णूनामुन्मनास्मि मदर्थिनाम् ॥५८॥
यत्किंचित्परमं लोके तत्तदस्मि जनार्दन । मया व्याप्तमिदं विष्णो विश्वमव्यक्ततेजसा ॥५९॥

श्रीशुक उवाच ।

इति ब्रुवन्नचिंत्यात्मा सर्वेषामेव पश्यताम् । विसृज्य मानुषं भावं वैश्वात्म्यं जगृहे तथा ॥६०॥
तथा विसृष्टवैश्वात्म्यं स्वानंदेनातितृंहितः । परमाकाशतामेत्य रामो लक्ष्यतमब्रवीत् ॥६१॥'

श्रीराम उवाच ।

अदृष्टमूर्त्तेरभवद्रिरंसोर्मत्तो रमेश ध्वनिरंवरादिः ।
मदिच्छयैवाखिलवाक्प्रपंचस्ततः, परस्मादुदभूदुदर्कः ॥६२॥
लीने च यस्मिन्स्वयमद्वितीयः, स्फुरामि साक्षादहमेक एव ।
योगोत्थितेनाप्यमृतत्वमेषां, भवेद्यतीनामिह एव येन ॥६३॥
इतोष्टमायात्मभुवे विधातुः, पुरत्वतोताय कृशानुशीर्ष्णो ।
मयोपदिष्टं गगनादिसृष्टेः, प्रागेव कालोत्तरमाद्यतंत्रम् ॥६४॥
तदेवदिग् विश्वसृजाममीषां, तत्वत्रयात्मा विवृतं यथावत् ।
यत्रैव दृष्टाः सकलाश्च वेदा यैरात्मभूर्विश्वमयं व्यधत्त ॥६५॥
व्योम्नीव ताराणि यदक्षराणि, स्फुरंति चात्रैव मदंतराले ।
मच्छक्तयस्त्वत्प्रमुखा मुरारे, यैर्व्यक्तिमायांति सुराः समस्ताः ॥६६॥
येभ्यः समुद्धृत्य मयोपदिष्टमुपास्यते तारकमंत्रराजम् ।
सृक्षंत्यनेनैव जगंति रुद्राः सिद्धाश्च साध्या ऋषयश्च भूयः ॥६७॥
अनेन मंत्रेण च बालखिल्या, वैखानसा मद्गतचेतसोऽत्र ।
सृष्ट्वैव सम्यक्सुविधूतमाया मामेव चेष्यंत्यपि चक्रपाणे ॥६८॥
प्राणांस्त्यजंतो मणिकर्णिकायां यद्वाचकं तारकमुच्चरंतः ।
श्रुत्वा च वेदान्तमुपास्य वाच्यं, पश्यन्ति मामेव हि विश्वनाथम् ॥६९॥'
प्राप्यैनमाराध्य च मामनेन हिरण्यगर्भा मुनयोपि सप्त ।
ज्ञानं च मन्निष्टमुपेत्य सम्यक्, दिवि प्रथंते मदनुग्रहेण ॥७०॥
अयं च मैत्रावरुणिर्विधातुरस्मात्तृतीयो भविता स्वयंभूः ।
व्यासश्च विष्णुर्भविता चतुर्थः, स्कंदो मृडोस्मादपि शूलपाणे ॥७१॥
मत्प्राप्त्युपायप्रथनार्थमेव, ब्रह्माण एते बहवो नियुक्ताः ।
यूयं च मद्वैभवबोधनार्थं रुद्रा मदाच्छादनहेतवे च ॥७२॥

वेदेष्वमी विश्वसृजः प्रधानाः, यूयं च मुख्याः श्रुतिमस्तकेषु ।
सर्वेषु शास्त्रेषु तथागमेषु, रुद्रा अमी मुख्यतमा भवंति ॥७३॥
ममैकांशे जगत्यस्मिन्प्रतिगोलमवस्थिता । तत्तद्गुणाधिपतयो ब्रह्मविष्णुकपर्द्दिनः ॥७४॥
तत्रांडकोशे चैतस्मिन्मुक्तकोशोयमात्मभूः । विष्णुः पालयिता चास्य त्वमंडस्यामृतेश्वरः ॥७५॥
रुद्रोप्यसावहिर्बुध्न्यः संहरिष्यति तत्पुनः । अस्य विश्वसृजः सर्गे भुवनानि चतुर्दश ॥७६॥
भूमाविह त्वदंशोसावभूद्दशरथो नृपः । यत्रावतीर्णं मां सर्वे वदंत्यजमपि प्रभुम् ॥७७॥
आदौ गुणानामधिपैर्भवद्भिरमरेश्वरैः । मयैव सृष्टैः क्रीडार्थं सृष्टिस्थित्यंतकारणैः ॥७८॥
स्वेषु स्वेष्विह कल्पेषु तपस्तप्तं सुदारुणम् । अमूर्त्तेरपि मे नित्यं रूपस्यास्य दिदृक्षया ॥७९॥
साकं भवद्भिर्गंधर्वो विश्वावसुरपि स्वयम् । सहस्रसत्रैरिष्ट्वा मां सामशाखासहस्रवित् ॥८०॥
मामेव तोषयामास गायं गायं च सामभिः । निरूपमपि मां द्रष्टुं महामायाविमोहितः ॥८१॥
मर्त्यरूपमनेनापि वृत्तं तत्वमजानता । निवृत्तधर्मानुत्सृज्य काम्यकर्म्माणि कुर्वता ॥८२॥
राक्षसत्वमपि प्राप्तममूर्त्तेर्मूर्त्तिमिच्छता । मद्भक्तिलब्धयोगेन प्राप्स्यते च मदात्मताम् ॥८३॥
प्राप्तं चानेन निधनं मत्त एवान्यदुर्ल्लभम् । रावणोऽयं महाबाहुर्मनुत्वमुपयास्यति ।
पुनरिंद्रत्वमासाद्य भुक्त्वा भोगान्यथेप्सितान् ॥८४॥
गुरोस्तु वामदेवस्य नित्यं शुश्रूषणेरतः । कुशनाभ इतिख्यात ऋषित्वमुपयास्यति ॥८५॥
ऋषेरुद्दालकस्याथ पुत्रो योगविदांवरः । निवृत्तिधर्म्मैर्मामिष्ट्वा मत्सायुज्यमुपैष्यति ॥८६॥
मन्दरे गुरुणा शप्तः कण्वः सोयं विभीषणः । क्रव्यादत्वमपि प्राप्यन् जहौ धर्ममनुत्तमम् ॥८७॥
ऐंद्रं पदमनेनेह यावत्कल्पमभीरुणा । भोक्ष्यते मत्प्रसादेन मद्धाम प्राप्स्यते ततः ॥८८॥
यद्गोलेनैव भूर्नापस्त्रीणि भूताणि सर्वदा । शीतोग्निभीरुतस्तीव्रो ब्रह्माख्यस्य प्रजापतेः ॥८९
जायंते जंतवो वह्नेः कामरूपा सुखोल्वणाः । व्योमगेहा वह्निभुजो वायुभाजो मनोजवाः ॥९०॥
तत्रैकपादं यो रूद्रो हनूमान्मत्परायणः । द्वात्रिंशदर्बुदान्येव रुद्राणां पर्युपासते ॥९१॥
मद्भक्तिलब्धयोगस्तु मत्प्रसादाप्तवैभवः । आपदुद्धरणश्चायं भजतां नात्र संशयः ॥९२॥
संग्रहेण प्रवक्ष्यामि गुह्यमन्यत् तवाच्युत । येन विज्ञानमात्रेण छिद्यते संशयः स्वयम् ॥९३॥
येयं सीता महामाया शक्तिर्मे क्रीडतः सदा । भिन्नेव दृश्यतेऽभिन्ना जानीहि विश्वमेव ताम् ॥
कार्यकारणरूपेण येयमेका प्रवर्त्तते । यस्य तत्त्वं न जानंति देवास्तत्प्रमुखा अपि ॥१५॥
अनुवाकश्रुतिभिः प्रोक्ता यया मुच्येत बंधनात् । एष मे प्रथमः पादः परमोपनिषत्ततः ॥९६॥
न यत्र शक्तिस्तत्वानि पराणि नैव किंचन । तदेव परमं व्योम भावाभावविलक्षणम् ॥९७॥
मद्रूपमचलं नित्यं सत्यमाद्यंत वर्जितम् । तदेतदपि वैश्वात्म्यं हेयं स्याद्यदपेक्षया ॥९८॥
यत्र कुंठीभवंत्येव मानानि सकलान्यपि । परमं तद्धि निर्वाणं मदनुग्रहतो भवेत् ॥९९॥
मद्भावभाविता यूयं मन्मयाश्च भविष्यथ । स्वस्वकर्माणि कुर्वंतो रमध्वमकुतोऽभयाः ॥१००॥

श्रीशुक उवाच ।

इति रामवचः श्रुत्वा सुरा विष्णुपुरोगमाः । शिरस्यंजलिमाधाय प्रणिपत्य पुनः पुनः ॥१०१॥
जपंतो राम रामेति शब्दब्रह्मपरायणाः । स्मरन्तस्तच्च वैश्वात्म्यमनुसंदधिरे च तम् ॥१०२॥
स्तोत्रं पठेद्यो हरिणा प्रणीतं, रामं विभुं तं प्रणिपत्य मूर्ध्ना ।
इन्द्रादिलक्ष्मीमनुभूय चांते, पदं च विष्णोः परमं स गच्छेत् ॥१०३॥
भूरादिलोकभर्त्तारं भगवन्तमधोक्षजम् । उपेंद्ररूपिणं शश्वत्प्रपन्नोस्मि रघूत्तमम् ॥१०४॥
इति श्रीनिर्वाणखंडस्य स्कंदपुराणोपनिषद् द्वात्रिंशत्तमोऽध्यायः श्रीरामगीतायां द्वितीयोऽध्यायः ।

श्रीशुक उवाच ।

ततस्त्यक्तोपसंहारं स्तोत्रैः शंभुमुखोद्गतैः । भूयः प्रसन्नं वदनं विष्णुगीतैरपिस्तवैः ॥१॥
परं भावं तिरोधाय सूक्ष्मभावे प्रतिष्ठितम् । रामं विश्वेश्वरं ब्रह्मा स्तोतुं समुपचक्रमे ॥२॥

ब्रह्मोवाच ।

नमः पुंसे पुराणाय षड्विंशाय महात्मने । उद्भवस्थितिसंहारमूलबीजाय तेजसे ॥३॥
कार्यकारणकर्तृभ्यो विलक्षणपदायते । त्रिवेदीचक्षुषे तुभ्यं त्रिगुणातीतमूर्त्तये ॥४॥
तुभ्यं विश्वसृजे धात्रे ब्रह्मणः पतये नमः । विष्णवे विश्वभर्त्रे च विष्णूनां पतये नमः ॥५॥
रुद्राय विश्वसंहर्त्रे रुद्राणां पतये नमः । विश्वेदेवाय महते नमस्ते परमात्मने ॥६॥
स्वेच्छया पंचविंशाय कूटस्थायाऽविनाशिने । निस्तत्वाय नमस्तुभ्यं तत्त्वानां पतये नमः ॥७॥
नियत्याकांतविश्वाय नियंत्रे नियतेरपि । निष्क्रियाय नमस्तुभ्यं विश्वकर्मैकसाक्षिणे ॥८॥
प्राग्दृशा हविषे तुभ्यं प्रत्यग्दृष्ट्या हविर्भुजे । तयोश्च साक्षिणे होत्रे नमस्त्रेधास्थितात्मने ॥९॥
क्रियाशक्ते ऋचो रूपं ज्ञानशक्तेर्यजूंषि च । सामानि चेच्छाशक्तेस्तेप्यर्थवांगिरसो विभोः ॥१०॥
श्रीस्ते काये सदेवास्ते मनसीच्छा सदा शिवा । वाणी साक्षाद्भगवती सदैवास्ते सरस्वती ॥११॥
विश्वमूर्त्तेरनंतानि वर्णानि तव वैखरी । मध्यमा मध्यमं चेतः पश्यन्ति यत्तवोत्तमम् ॥१२॥
आद्यं यदेतदव्यक्तं गुणाऽतीतं सदोदितम् । निर्वाणमक्षयं साक्षात्परात्मपरमं पदम् ॥१३॥
न स्थानानि न चाकारो न रूपाणि न हेतवः । न वाहनानि कल्पानि निराकारस्य ते विभो १४
विश्वामरनराकारा भक्तानुग्रहहेतवे । क्रियंते भवता नाना धर्मसंस्थापनाय च ॥१५॥
कालः कलयते विश्वं तं त्वं कलयसि प्रभो । स त्वां कलयितुं नालं राम त्वन्नेत्रसंभवः ।१६।
नाहं स्रष्टा न च त्राता विष्णुर्नाप्तकरो हरः । त्वदंशैरेव सकलं विद्यते निरपेक्षया ॥१७॥
ईक्षसे विश्वतश्चक्षुर्भुक्षेस्त्वं विश्वतोमुखः । करोषि विश्वतोबाहुर्विश्वतश्चाथ गच्छसि ॥१८॥
पदे प्रतिष्ठिता मर्त्याः शीर्ष्णि देवा व्यवस्थिताः । नाभेर्विनिःसृता वेदाः श्रोत्रैर्व्याप्तं चराचरम् ॥
वृषस्त्रिपाच्चतुःशृङ्गः सप्तहस्तो द्विमस्तकः । सदास्वस्त्रिधाबद्धो महान् देवस्त्वमेव हि ॥२०॥

त्वमेव यज्ञत्वं यष्टा त्वं हविस्त्वं हि देवता। त्वमेव चर्त्विजो मंत्रांस्त्वं वैश्वानरयज्ञभुक् ॥२१॥
त्वं सर्पिस्त्वं वसंतस्त्वं ग्रीष्मोभूदिध्म एव च। शरदेव हविः पूतं सप्तास्यः परिधीयते ॥२२॥
तवास्ये हूयते विश्वं त्वदास्याय त्वया प्रभो। त्वत्प्राप्तये सदानंद क्रतुरेषः सनातनः ॥२३॥
दुर्ल्लंघ्येयमिहास्माभिर्नियतिः पारमेश्वरी। त्वत्तीव्रशक्त्या तामेव मुक्तये मृगयामहे ॥२४॥

चतुर्भिर्वर्णैश्च पुनश्चतुर्भिः, द्वाभ्यां च विप्रा इह पंचभिश्च।
हुत्वैव यज्ञाय पुनश्चतुर्भ्यः, द्वाभ्यां हि साक्षादमृतीभवंति ॥२५॥

जाग्रद्विश्वं स्वप्नमेतद्धि तेजः, प्राज्ञश्चायं याति सूक्ष्मां सुषुप्तिम्।
सूक्ष्मात्सूक्ष्मं धाम यद्वा तुरीयं, ब्रह्माखंडं राम चैतत् त्वमेव ॥२६॥

ये त्वां भजंति वपुषा मनसा च वाचा, तेषां भवंति करणानि पवित्रितानि।
यैरैक्यमेव भवता सहमुक्तमायैरास्वाद्यते ननु निरावरणैर्महेश ॥२७॥

ध्यातो भवान् यदि हृदा क्षणमार्त्तबंधो, किं तज्जहात्यणुविभुत्वपदं कदाचित्।
वागप्यनाहतभवा परमा वरांतः त्वां वक्ति रामिति विभुं नभसो निदानम् ॥२८॥

बाह्यन्तराणि करणान्यपि तैः स्वभावैर्मुक्तोन्यखंडितपदं कथमुत्सृजेयुः।
देहः स्वकर्मविभवैश्च भजन् भवन्तं विश्वाकृतिं क्रतुवशात् स्वयमाददाति ॥२९॥

प्रागिंधनान्यपि जड़ानि हुताशनांतः, क्षिप्तानि किं नहि भजंति हुताशनत्वम्।
तत्त्वान्यमूनि कथमीश जडानि तद्वत्त्वत्तः पृथक् त्वयि गतानि विभोर्भवेयुः ॥३०॥

त्वामेकमेव बहिरन्तरभिन्नमायाः, पश्यन्त्यपास्ततमसो मुनयश्चिदर्कम्।
यस्यांशवोर्कहुतभुग्गृहिमरश्मयः स्वैराभासयंति भुवनानि करैस्त्रयोपि ॥३१॥

विश्वाकृतिं हरिविरंचिशिवादिमूर्त्तिं, तत्वाकृतिं तव निरंतरबोधसत्वम्।
सम्यग्भजंति इह तत्समरूपलोकाः, सान्निध्यभाज उपयांति च तन्मयास्ते ॥३२॥

एकत्वमेव सकलं करणानपेक्ष्यः साक्षात्करोपि युगपद्भगवंस्त्वलक्ष्यः।
नैवास्ति तद्यदखिलैः करणैः क्रमेण, साक्षात्करोति परमेश्वर कुत्रचित्त्वाम् ॥३३॥

ये त्वामपास्ततमसो निजया विभूत्या, सुव्याप्तविश्वमचलं परमद्वितीयम्।
ध्यायंति लीनपवनास्त्वयि लीनचित्ताः, कालाशिनां यमभयं कुत एव तेषाम् ॥३४॥

क्व श्रीरियं परिमिता सुकृतैरुपात्ता, क्वात्म्ये स्थितेयमचला महती विभूतिः।
राम त्वदुत्तमपदैकजुषां मुनीनामिंद्रादिसंयदपि तुच्छकपर्दिकैव ॥३५॥

स्तुमः कथं त्वामतिवाचमेते, वेदादयो यच्छ्वसितं समस्ताः।
विद्मः कथं त्वां मनसोऽतिभूमिं, विश्वातिगं विश्वसदः सदैव ॥३६॥

श्रीशुक उवाच ।

इत्यादिभिः स्तुतिशतैः परितोष्य रामं, वाचामगोचरतयैव हृदात्मनाथ ।
ध्यात्वैव तत्वमधिगम्य स पद्मयोनिरानंदमग्नमनसैव बभूव तूष्णीम् ॥३७॥
अथ प्रशांतमीशानं परमानन्दविग्रहम् । मुनयो बालखिल्याद्यास्तुष्टुवुर्हृष्टमानसाः ॥३८॥

बालखिल्य उवाच ।

त्वत्तः परं नापरमस्ति किंचित्त्वत्तो नाणीयो न ज्यायोस्ति किंचित् ।
स्वराट् सदैकोस्यचलो विभूः सन्नाकाशमाकाशयसे निगीर्य्य ॥३९॥
न कर्मणा वा प्रजया धनैस्त्वं, प्राप्योसि सर्वत्र सदात्मतृप्तः ।
लभ्योवधूतैश्च गुहांतरुच्चैरुद्गीथमुच्चार्य सदैकरूपः ॥४०॥
ये तु त्वदर्थां विहिताश्च धर्मास्तान्नैव कुर्वन्ति विपश्चितो ये ।
तेषामधर्मेषु कुतो मतिस्यात्त्वद्भक्तिविघ्नप्रभवा यतस्ते ॥४१॥
हिंसानृतस्तेयपरिग्रहेभ्यो, निवृत्तिरुच्चैर्विजितेंद्रियत्वम् ।
संतोषआस्तिक्यमखण्डभक्तिस्त्वयि प्रसन्ने कृतिनां भवंति ॥४२॥
संसारभीत्या त्वदुपाश्रयत्वं, भोगेषु दोषैकविलोचनं च ।
त्वदेकभावस्त्वयि सुप्रसन्ने, त्वत्प्राप्त्युपाया यमिनां जयंति ॥४३॥
प्राणे परिस्पंदति तत्वराजे, चित्तेऽनुधावत्यपि तन्निबद्धे ।
देहाद्यनात्मग्रहतोऽभिमत्यां, अहं कृतावीश कुतो विमुक्तिः ॥४४॥
हृताशयो व्योम्नि लयः स्वसत्तामात्रस्थितिर्नित्यमलोलुपत्वम् ।
गुरोरभेदो भवता स्वसाम्यं, सर्वेषु भूतेषु भवत्प्रसादात् ॥४५॥
लोष्टोपमानिंद्रियगोचरेषु, भोगेषु तेषां विषतुल्यतां च ।
संपश्यतस्त्वत्कृपयैव जंतोः, स्याच्चित्तनाशादिह एव मोक्षः ॥४६॥
त्वामेव वाह्यांतरखंडमेकं, दृष्ट्वा हि संकोचममी विलाप्य ।
पूर्णाश्च ते त्वामवलंब्य सिद्धाः, सायुज्यसाम्राज्यपदे रमंते ॥४७॥
निरंतरस्योदरमंतरं ते, पश्यन् भयानां महतां पदं स्यात् ।
प्रत्यग्दृशस्तस्य कुतो भयं स्याद् यो नेक्षते किंचिदपि स्वतोन्यत् ॥४८॥
देहानिलांतःकरणाद्यहंता, हवींषि चोन्नीय नमः श्रुचैव ।
स्वाराज्यमेकः प्रणवेन पूर्णो, हुतानले जुह्वति हैव भक्तो ॥४९॥
तावन्निबध्नंति पशुत्वमेते, भावास्त्रयस्तत्त्वमहं मृषेति ।
यावन्मनो नास्तमियात्तमोघं, त्वय्येव विद्व्योम्नि निरंतराले ॥५०॥

त्वदर्थकर्माण्यनुतिष्ठतां ते, जपं च वाचा परया त्वदर्थम् ।
प्राणे प्रशांते गगनांतराले' त्वय्येव चित्तं प्रलयं प्रयाति ॥५१॥
भवो यदज्ञानत एव पुंसां, मोक्षोपि यज्ज्ञानत एव सद्यः ।
तत्कुर्महे केवलमेव तस्मै, तुभ्यं परस्मै नम ईश्वराय ॥५२॥

नमः परस्मै हंसाय तुभ्यं शुचिषदे नमः । अंतरिक्षसदे तुभ्यं वसवे तिग्मतेजसे ॥५३॥
नमो होत्रे पुराणाय तुभ्यं वर्हिषदे नमः । नमो द्रोणसदे तस्मै तुभ्यं त्वतिथये नमः ॥५४॥
नमोस्तु निषदे कर्त्रे तुभ्यं वरसदे नमः । नित्यं त्वत्सदे धात्रे नमो व्योमसदे सदा ॥५५॥
नमो मृताय सत्याय सवित्रे विश्वचक्षुषे । त्रिधाम्ने हेमवर्णाय नमस्ते विश्वरेतसे ॥५६॥
विष्णवे शिपिविष्टाय पशूनां पतये नमः । पुरोहिताय क्रतवे पुरुहूताय ते नमः ॥५७॥
नमस्ते सामतनवे शब्दब्रह्मैकमूर्त्तये । त्रिमूर्त्तये नमस्तुभ्यं परस्मै ब्रह्मणे नमः ॥५८॥
गरुत्मांस्त्वं सुपर्णोसि त्रैवृत्तशिर उच्यते । स्तोमस्तवात्मा यज्ञस्य गायत्रं चक्षुरुत्तमद् ॥५९॥
बृहद्रथंतरे पक्षौ वामदैव्यं वपुस्तव । छंदांस्यंगानि पुच्छं च यज्ञायज्ञीयमेवते ॥६०॥
बृहतस्ते सदाधिष्ट्यं तव नाम यजूंषि च । एवं ते तारकं रूपं वयं नित्यमुपास्महे ॥६१॥

श्रीशुक उवाच ।

इतिस्तुवंतस्ते भक्त्या तद्धामाविष्टचेतसः । तत्रैव ब्रह्मणि परे समाधिं प्रतिपेदिरे ॥६२॥
ब्रह्मविष्णुशिवाचिन्त्यं ज्ञात्वा श्रीराममीश्वरम् । इन्द्रो भक्तिमुपाश्रित्य स्तोतुं समुपचक्रमे ॥

इन्द्र उवाच ।

पाहीश नः करुणया परया भवाब्धेः कर्मांटवीष्वनुदिनं परिवर्त्तमानात् ।
निस्तत्त्वनिष्क्रियनिरंतरनिःप्रपंचम्, स्वानंद राम सततं तव किंकराः स्म ॥६४॥
त्वामप्यगोचरमकृत्रिमभारतीनां, ब्रह्माद्यचिंत्यमचलं प्रभुमद्वितीयम् ।
कोदंडशासनगुरुं परिषन्नराणां, भूपालमेव बुबुधे रघुवंशदीपम् ॥६५॥
रुद्रं त्रिनेत्रमहिभूषणमिंदुमौलिं, विष्णुं नवाम्बुदनिभं गरुड़ाधिरूढम् ।
ब्रह्माणमब्जनिलयं चतुराननं त्वामस्वप्नसंसदि यमीश्वर पश्यतीह ॥६६॥
तत्त्वावबोधनिपुणा परिषन्मुनीनां, ब्रह्मैकमेवमनुते निगमांतगीतम् ।
विश्वं च सिद्धनिवहस्तदतीतमाद्यं, योगींद्रसंसदि यमीश भवन्तमेव ॥६७॥
इत्थं परावरतया बहुरूपमेकं, त्वामेव राम कवयो बहुधा गृणंति ।
विश्वैकनाटकविधायिनमप्रमेयं, त्वां मन्महे बहुतरं परमेशमेव ॥६८॥
कालस्य कालभवदक्षिनिमेषकाले, ब्रह्मादयः सुरवराः कति न स्युरेते ।
येषामहन्यहनि वा स्म चतुर्दशेंद्रांश्चास्मदिनं मनुजहायनमेकमुक्तम् ॥६९॥

एकोप्यजो विभुरहं वहुधा द्वितीयः, स्यामीक्षथास्त्वमिति राम यदा कदाचित् ।
तिस्रस्तदा समभवन्परमक्रियेच्छा, ज्ञानात्मिका निजरतेस्तव शक्तयोऽपि ॥७०॥
यासां कलाविलसितेषु दशास्यकीटकोटिः क्व चेंद्रमशका इति नैव विद्मः ।
तासां तु मूलजननी निजशक्तिराद्या, सीता यदर्थमिह ते किल युद्धलीला ॥७१॥
कस्ते कामः स्वात्मरामस्य को वा, क्रोधः साक्षाद्विश्वमूर्त्तेस्त्वयीश ।
को वा मोहः सच्चिदानंदभानोर्मोहो मूलं कल्पनेयं त्वयीत्थम् ॥७२॥
इच्छामूलं कर्मणां भ्रांतिरस्या, मूढानां नो भ्रांतिरद्धा सदैव ।
त्वद्भक्त्यैव ज्ञानमासाद्य सम्यग् भिद्यंत्येते भ्रांतिमूलं मुनींद्राः ॥७३॥
यत्रैव जीवन्ति निरस्तकामाः, स्वात्मैकतृप्ताः परमावधूताः ।
तत्र म्रियन्ते पशवः सकामा, वहिर्दृशस्त्वद्विमुखा महेश ॥७४॥
गुणोल्वणा निश्वसितं हि वेदास्तन्मौलयश्चोच्छ्वसितं गुणाद्याः ।
अचिंत्यशक्तेस्तव लीलयोभौ, स्यातां पशूनामिह वंधमोक्षौ ॥७५॥
मोहात्कामस्तद्विपाकक्रमोत्थः, क्रोधो मोहश्चेति पाशैर्निवद्धम् ।
चक्रावृत्त्या संसरन्तं सदा मां, पाशाँश्छित्वा मोचयेत्त्वामृते कः ॥७६॥
स्वस्वाधिकारेषु गुणैर्निवद्धा, भोगान्धनेत्राः पतिता भवाब्धौ ।
त्वं तारकश्चेदित उत्पतंतस्त्वय्येव लीयेमहि रामभद्र ॥७७॥
षड्विंशदावृत्य महाचिदास्ते तिष्ठन्ति तत्वानि तवाज्ञयैव ।
त्वत्तीव्रशक्त्या यदि भित्सितानि, त्वत्तोस्ति नः कश्चिदणुर्न भेदः ॥७८॥
भोगेषु या स्यात्स्वत एव सेच्छा, त्वय्येव मे स्यात् यदि कर्म वा स्यात् ।
ज्ञानं च तेनैव भवत्प्रतिष्ठं, त्वयि प्रसन्ने सकलं तदेतत् ॥७९॥
विज्ञप्तिमाकर्ण्य विधत्स्वभावा, भवार्तिंशान्तिं मम दीनवन्धो ।
यत्ते पशूनामिदमेव याचे, भक्तिर्ममेयं त्वयि निश्चलास्तु ॥८०॥
भवत्प्रसादस्त्वयि भक्तितः स्यात् कायेन वाचा मनसापि सापि ।
तत्कुर्महे तुभ्यमशेषभावैर्नमो, नमस्याय परात्पराय ॥८१॥
नमः शब्दार्थनेत्राय तुभ्यं शब्दातिगाय च । नमो देवाधिदेवाय तुभ्यं विश्वैकयोनये ॥८२॥
नमो वेदांतवेद्याय तुभ्यं वेदमुखाय च । त्रिशून्याय नमस्तुभ्यं निश्चलज्योतिषे नमः ॥८३॥
सत्यानामपि सत्याय नमो विज्ञानमूर्त्तये । निर्मलानंदमात्राय नमस्तुभ्यं नमो नमः ॥८४॥
त्वं यज्ञस्त्वं वषटकारस्त्वं विष्णुस्त्वं प्रजापतिः । त्वमेव होता मंत्राश्च त्वमिन्द्रस्त्वं हुताशनः ॥८५
त्वमेव दक्षिणा श्रद्धा त्वं हविस्त्वं च देवता । त्वमेव सोमस्त्वं कामस्त्वं मनः कारणानि च ॥८६
त्वमेव विद्याऽविद्ये च कालः प्रकृतिरेव च । त्वमेव फलदाता च दीक्षितानां क्रियाक्षये ॥८७॥

विश्वकृद्विश्वभुक् त्वं च विश्वहृद् विश्वमेव च । त्वं हविर्विश्वदृक् शुद्धो नित्यतृप्तो महोदय ।८८
सुवर्णवर्णो हेम त्वं वरेण्यः सविता प्रभुः । विश्वाधिको महर्षिस्त्वं विश्वेदेवास्त्वमेव हि ॥८९॥
त्वमोंकारश्च कालघ्नः कर्त्ता हर्त्ता विराट् शिवः । ऋचो यजूंषि सामानि ऋतं सत्यं तपो महत् ९०
त्वामेव परमात्मानं कूटस्थमचलं ध्रुवम् । व्योमदेहं महादेवं महायज्ञैर्यजामहे ॥९१॥
ब्रह्मादयोपि यस्यान्तमलब्ध्वा तोषमासते । कोन्यस्त्वां तोषयेत्स्तोत्रैरुरुगाय नमोस्तुते ॥९२॥

श्रीशुक उवाच

इत्थं यथामति विधाय स्तुतिं तुराषाट् प्रोवाच चैनमभिषिच्य सुरद्रुपुष्पैः ।
राम त्वमेव शरणागतदुःकृताय, दुष्टाटवीदवहुताशननामरूपः ॥९३॥
आहृत्य वाद्यनिकरान्सह लोकपालैरानर्च्चयन्प्रतिदिशं सुरयोषितश्च ।
रामो जयत्यखिललोककुलादिनाथो गायन्निति प्रतिपदं विरराम शक्रः ॥८४॥
इति भक्तिमता तेन संस्तुतः शतमन्युना । निरीक्ष्य सकलान्देवान् रामः प्रोवाच हर्षयन् ॥९५

श्रीराम उवाच

भो भोस्तत्त्वाधिपतयो मुनयश्च तपोधनाः । सिद्धाः साध्याश्च पितरो ये चान्ये गोलवर्त्तिनः ॥
मयैतद्विदितं सर्वं यदर्थं यूयमागताः । तत्तथैव विधास्यामि भयं वो व्यपगच्छतु ॥९७॥
भवद्भिर्यदिदं दृष्टं वैश्वात्म्यं मम शाश्वतम् । एकांशमात्रमेतद्धि ब्रह्माण्डानेकमंडितम् ॥९८॥
अतः ऊर्ध्वमसंसक्तस्तत्त्वातीतो निरन्तरः । नित्यशुद्धो निरातंको मानातीतो निरंजनः ॥९
निरंशो यः पराकाशो भावाऽभावविलक्षणः । निस्तरंगः सदानन्दसुधाब्धिरतिनिर्मलः ॥१००॥
निरालम्बो निराकारो विभुरेकः परः स्वराट् । सोऽहं भवद्भिरखिलैर्द्रष्टुं शक्यो न जातुचित् ॥
भक्त्यैव दृढया सम्यक् नित्यमभ्यासिनः सुराः । ममैतत्परमं रूपं यूयं* द्रक्ष्यथ चापरे ॥१०२

श्रीशुक उवाच ।

इत्यौपनिषदं तत्त्वं स्तोत्रसूत्रैः प्रकाशितम् । स्मारं स्मारं च ते सर्वे क्षणं तन्मयतां ययुः ॥
ज्ञातज्ञेयाश्च ते सिद्धाः शुचयो हंसविग्रहाः । जपन्ति मानसे तीर्थे ब्रह्मविद्यामिमां स्तुतिम् ॥
अस्य स्तोत्रस्य माहात्म्यं मया वक्तुं न शक्यते । दातुं समीहितानर्थान् कामधुङ्ग नात्र संशयः
ध्यात्वा तमीड्यं पुरुषं महान्तं, रामं वरेण्यं त्रिदशैकनाथम् ।
स्तोत्रं तदेतच्चतुराननोक्तं, पठन्प्रयात्यक्षयमेव धाम ॥१०६॥
स्तोत्रत्रयमिदं नित्यं पठतां शृण्वतामपि । जायते योगसम्पत्तिर्वैराग्यं भक्तिरीश्वरे ॥१०७॥
यदक्षरं पदभ्रष्टं मात्राहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देव प्रसीद रघुनन्दन ॥१०८॥

इति श्रीस्कन्दपुराणीयोपनिषत्सारभूतनिर्वाणखण्डस्थद्वात्रिंशत्तमोऽध्यायः समाप्तः ।
समाप्ता चेयं श्रीरामगीता । श्रीसीतारामचन्द्रार्पणमस्तु ।

* इदानीं पश्यथ पुनर्द्रक्ष्यथापरे नरा द्रक्ष्यन्तीत्यर्थः ।